# Yantrodharaka Hanumath stotram In Hindi

**Yantrodharaka Hanumath stotram Hindi Lyrics (Text)**
**Yantrodharaka Hanumath stotram Hindi Script**

नमामि दूतं रामस्य सुखदं च सुरद्रुमम्
पीनवृत्त महाबाहुं सर्वशत्रुनिवारणम्  ॥१॥

नानारत्नसमायुक्तं कुंडलादिविराजितम्।
सर्वदाभीऽष्टदातारं सतां वै दृढमाहवॆ  ॥२॥

वासिनं चक्रतीर्थस्य दक्षिणस्थगिरौ सदा।
तुंगांबॊधितरंगस्य वातॆनपरिशॊभितॆ  ॥३॥

नानादॆशगतैः सद्भिः सॆव्यमानं नृपॊत्तमैः।
धूपदीपादिनैवॆद्यैः पंचखाद्यैश्चशक्तितः  ॥४॥

भजामि श्रीहनुमंतं हॆमकांतिसमप्रभम्।
व्यासतीर्थयतींद्रॆण पूजितं च विधानतः  ॥५॥

त्रिवारं यः पठॆन्नित्यं स्तॊत्रं भक्त्याद्विजॊत्तमः ।
वांचितं लभतॆऽभीष्टं षण्मासाभ्यंतरॆ खलु  ॥६॥

पुत्रार्थी लभतॆ पुत्रं यशॊर्थी लभतॆ यशः।
विद्यार्थी लभतॆ विद्यां धनार्थीलभतॆ धनम्  ॥७॥

सर्वथा माऽस्तु संदॆहॊ हरिः साक्षी जगत्पतिः ।

यः करोत्यत्र संदेहं स याति नरकंण् ध्रुवम् ॥८॥

॥इति श्रीव्यासराजयतिकृत यंत्रोद्धारक हनूमत् स्तोत्रम् ॥